“पूर्णा षडेव तत् । “लुप्ता सामान्यधर्म्मादेरेकस्य यदि वा द्वयोः । त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्व्ववत्०॥ सा लुप्ता । तद्भेदमाह ।“पूर्णावद्धर्म्मलोपे सा विना श्रौतीन्तु तद्धिते” । सा लुप्तोपमा धर्म्मस्य साधारणगुणक्रियारूपस्य लोपे पूर्णावदिति पूर्व्वोक्तरीत्या षट्प्रकारा, किन्त्वत्र तद्धिते श्रौत्या असम्भवात् पञ्चप्रकारा । उदाहरणम् । “मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये! । वाचः सुधा इवौष्ठस्ते विम्बतुल्यो मनोऽश्मवत्” ॥ “आधारकर्म्म विहिते द्विविधे च क्यचि क्यङि। कर्म्मकर्त्रोर्णमुलि च स्यादेवं पञ्चधा पुनः” ॥ धर्म्मलोपे लुप्तेत्यनुषज्यते । क्रमेणोदाहरणम् । “अन्तःपुरीयसि रणेषु, सुतीयसि त्वं पौरं जनं, तव सदा रमणीयते श्रीः । दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्रसञ्चार मत्र भुवि सञ्चरसि क्षितीश” ! ॥ अत्रान्तःपुरीयसीत्यत्र सुखविहारास्पदत्वस्य “सुतीयसीत्यत्र” स्नेहनिर्भरत्वस्य च साधारणधर्म्मस्य लोपः । एवमन्यत्र इह च यथादि तुल्यादिविरहात् श्रौत्यादिविशेषचिन्ता नास्ति । इदञ्च केचित् औपम्यप्रतिपादकस्य वतेर्लोपे उदाहरन्ति तदयुक्तम् क्यङादेरपि तदर्थविहितत्वेनौपम्यप्रतिपादकत्वात् । ननु क्यङादिषु सम्यगौपम्यप्रतितीर्नास्ति प्रत्ययत्वेनास्वतन्त्रत्वात् इवादिप्रयोगाभावाच्चेति चेन्न कल्पबादावपि तथा प्रसङ्गात् । न च कल्पबादीनामिवादितुल्यतयौपम्यस्य वाचकत्वं, क्यङादीनान्तु द्योतकत्वम्” इवादीनामपि वाचत्वे निश्चयाभावात् । वाचकत्वे वा समुदितं पदं वाचकं “प्रकृतिप्रत्ययौ स्वस्वार्थबोधकाविति च” मतद्वयेऽयि वत्यादिक्यङाद्योः साम्यमेवेति । यच्च केचिदाहुः “वत्यादय इवाद्यर्थेऽनुशिष्यन्ते क्यङादयस्त्वाचारार्थे इति” तदपि न । न खलु क्यङादय आचरमात्रार्था अपि तु सदृशाचारार्था इति । तदेवं धर्म्मलोपे दशप्रकारा लुप्ता ।“उपमानानुपादाने द्विधा वाक्यसमासयोः” । उदाहरणम् । “तस्या मुखेन सदृशं रम्यं नास्ते न वा नयनतुल्यम्” । अत्र मुखनयनप्रतिनिधिवस्त्वन्तरयोर्गम्यमानत्वादुपमानलोपः । अत्रैव च“मुखेन सदृशम्” इत्यत्र मुखं यथेदमिति”“नयनतुल्यमित्यत्र” “दृगिवेति” पाठे श्रौत्यपि सम्भवतीत्यनयोर्भेदयोः प्रत्येकं श्रौत्यार्थीत्वभेदेन चतुर्विधत्वसम्भवेऽपि प्राचीनरीत्या द्विप्रकारत्वमेवोक्तम् ।“औपम्यवाचिनो लोपे समासे क्विपि च द्विधा”।“वदनं मृगशावाक्ष्याः सुधाकरमनोहरम्” “गर्द्दभति श्रुतिपरुषं व्यक्तं निनदन्महात्मनां पुरतः”॥ अत्र “गर्द्दभतीत्यत्र” औपम्यवाचिनः क्विपो लोपः । न चेह उपमेयस्यापि लोपः । “निनदन्निति” अनेनैव निर्देशात् । “द्विधा समासे वाक्ये च लोपे धर्म्मोपमानयोः”। “तस्या मुखेनेत्यादौ” “रम्यमिति” स्थाने “लोके इति” पाठेऽनयोरुदाहरणम् ।“क्विसमासगता द्वेधा धर्म्मेवादिविलोपने” । उदाहरणम् । “विधवति मुखाब्जमस्याः” । अत्र “विधवतीति” मनोहरत्वधर्म्मलोपः । केचित्त्वत्रापि क्विप्प्रत्ययलोपमाहुः । “मुखाब्जमिति” अत्र समासगा । “उपमेयस्य लोपे तु स्यादेका प्रत्यये क्यचि”।“अरातिविक्रमालोकविकस्वरविलोचनः । कृपाणोदग्रदोर्द्दण्डः स सहस्रायुधीयति” ॥ अत्र स सहस्रायुधमिव आत्मानमाचरतीति वाक्ये उपमेयस्यात्मनो लोपः । न चेह औपम्यवाचकलोपः उक्तादेव न्यायात् । अत्र केचिदाहुः सहस्रायुधेन सह वर्त्तत इति ससहस्रायुधः स इवाचरतीति वाक्यात् ससहस्रायुधीयतीति पदसिद्धेः विशेष्यस्य शब्दानुपात्तत्वादिहोपमेयलोप इति तन्न विचारसहम् । कर्त्तरि क्यचोऽनुशासनविरुद्धत्वात् । “धर्म्मोपमेयलोपेऽन्या” यथा “यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्व्वे” । अत्र क्षीरोदमिवात्मानमाचरन्तीत्युपमेय आत्मा साधारणधर्म्मः शुक्लता च लुप्तौ ।“त्रिलोपे च समासगा” । यथा । “राजते मृगलोचना” । अत्र मृगस्य लोचने इव चञ्चले लोचने यस्या इति समासे उपमाप्रतिपादकसाधारणधर्म्मोपमानानां लोपः । “तेनोपमाया भेदाः स्युः सप्तविंशतिसंख्यकाः” । पूर्णा षड्विधा लुप्ता चैकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा । एषु चोपमाभेदेषु मध्ये अलुप्तसाधारणधर्म्मेषु भेदेषु विशेषः प्रतिपाद्यते “एकरूपः क्वचित् क्वापि भिन्नः साधारणो गुणः । भिन्ने विम्बानुविम्बत्वं शब्दमात्रेण वा भिदा” ॥ तत्र एकरूपे यथा “मधुरः सुधावदधरः” इत्यादि। विम्बप्रतिविम्बो यथा । “भल्लापवर्ज्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् । तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव” ॥ अत्र “श्मश्रुलैरित्यस्य” “सरघाव्याप्तैरिति” च दृष्टान्तवत्प्रतिविम्बनम् । शब्दमात्रेण भिन्नत्वे यथा । “स्मेरं विधाय नयनं विकसितमिव नीलमुत्पलं मयि सा । कथयामास कृशाङ्गी मनोगतं निखिलमाकूतम्” ॥ अत्र एक एव स्मेरत्वविकसितत्वे प्रतिवस्तूपमावच्छब्दभेदेन निर्दिष्टे । “एकदेशविवर्त्तिन्युपमावाच्यत्वगम्यते । भवेतां यत्र साम्यस्य” यथा ॥ “नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरःश्रियः । पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव”